# Chintanashcha ChidunmeshAh Thoughts and Glimpses by Shri Aurobindo

# શ્રીઅરવિન્દસ્ય ચિન્તનાશ્ચ ચિદુન્મેષાઃ

## Document Information

Text title : Chintanashcha Chidunmesha Sanskrit translation of Thoughts and Glimpses by Shri Aurobindo

File name : chintanAshchachidunmeSha.itx

Category : major_works, upadesha, advice

Location : doc_z_misc_major_works

Author : Shri Aurobindo Ghosh, rAmabhadradIkShita

Proofread by : Saritha Sangameswaran

Description-comments : Collection of thoughts by Shri Aurobindo Ghosh

Acknowledge-Permission: http://motherandsriaurobindo.in

Latest update : August 6, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# શ્રીઅરવિન્દસ્ય ચિન્તનાશ્ચ ચિદુન્મેષાઃ

શ્રીઅરવિન્દસ્ય “ઠોઉઘ્ત્સ્ અન્દ્ ગ઼્લિમ્પ્સેસ્” નામકકૃતે સંસ્કૃતાવરઃ

## લક્ષ્યં

જ્ઞાનચેષ્ટા અતીત્યૈવ જ્ઞાનં સમુપલપ્સ્યતે ।
તર્ક એવ સહાયોઽભૂત્ તર્ક એવાસ્તિ બાધકઃ ॥

એષણાનિ હ્યતીસ્યૈવ શક્તિઃ સમુપલપ્સ્યતે ।
યત્ન એવ સહાયોઽભૂદ્ યત્ન એવાસ્તિ બાધકઃ ॥

સર્વભોગાનતીત્યૈવ પરાનન્દોઽભ્યવાપ્સ્યતે ।
કામનૈવ સહાયાભૂઽત્ કામનૈવાસ્તિ બાધિકા ॥

ધ્યષ્ટિભાવમતીત્ત્યૈવ “પુરુષાઃ” સ્યામ તત્ત્વતઃ ।
અહમ્ભાવઃ સહાયોઽભૂદવહમ્ભાવોઽસ્તિ બાધકઃ ॥

મનુષ્યત્વમતીત્યૈવ “મનવઃ” સ્યાં સત્યતઃ ।
પશુભાવઃ સહાયોઽભૂત્ પશુભાવોઽસ્તિ બાધકઃ ॥

પરિણમ્યસ્ત્વયા તર્કઃ સમ્બોધૌ સુવ્યવસ્થિતે ।
સર્વાત્મના ભવ જ્યોતિર્લક્ષ્યમેતદ્ ધ્રુવં તવ ॥

પરિણમ્યસ્ત્વયા યત્નઃ સ્વાત્મશક્તેઃ પરિપ્લવે
સર્વદૈકરસે શાન્તે મહામહિમશાલિનિ ।
ભવ ચિચ્છક્તિરેવ ત્વં લક્ષ્યમેતદ્ ધ્રુવં તવ ॥

પરિણમ્યસ્ત્વયા ભોગઃસમનિર્વિષયોન્મદે ।
સર્વાત્મના ભવાનન્દો લક્ષ્યમેતદ્ ધ્રુવં તવ ॥

પરિણમ્યા પ્રૃથુગ્વ્યષ્ટિસ્ત્વયેયં વિશ્વમાનવે ।

સર્વાત્મના ભવેર્દિવ્યો લક્ષ્યમેતદ્ ધ્રુવં તવ ॥

પરિણમ્યઃ પન્નશ્ચાપિ પશ્વનાથે તથા ત્વયા ।
સર્વાત્મના ભવેઃ કૃષ્ણઃ લક્ષ્યમેતદ્ ધ્રુવં તવ ॥

ન યન્મયા શક્યમિહાદ્ય કર્તું કરિષ્યમાણસ્ય હિ લક્ષણં તત્ ।
અસમ્ભવત્વાનુભવો।ભવેડસ્મિન્ સમ્ભાવનાનાં શુભસૂત્રપાતઃ ॥

વિનશ્વરં વિશ્વમલક્ષ્યતેદં યતો હ્યસાધ્યં વદતો વિરોધિ ।
તસ્માત્પ્રભુઃ શાશ્વતસત્સ્વરુપઃ સત્સ્વાન્નિજાત્ સર્વમિદં સસર્જ ॥

અસમ્ભવો નામ હિ સમ્ભવાનામસાધિતાનાં બૃહતાં સમષ્ટિઃ ।
ઉચ્ચસ્થિતેરાવરણં સ યાત્રામાર્ગસ્ય ચાદ્યાપિ ન લઙ્ઘિતસ્ય ॥

મનુષ્યજાતેઃ પ્રગતિર્યદીપ્સિતાસ્ભાવના ધ્રૂનુ હિ પૂર્વકલ્પિતાઃ ।
વિચારણા ચેતતિ ચૈવમાહતા ભવત્યપૂર્વં નવસર્જનક્ષમા ।
નો ચેન્નિજાવૃત્તિમસૌ હિ યન્ત્રવત્ ।
કરોતિ તાં વેત્તિ ચ સત્ક્રિયાં ભ્રમાત્ ॥

નિજાક્ષ ભ્રમિરેવૈકા ન ગતિર્માનવાત્મનઃ ।
અક્ષયજ્યોતિષોડપ્યન્યા સૂર્યસ્યાસ્તિ પરિક્રમા ॥

આત્માનં વિદ્ધિ પશ્ચાચ્ચ કુરુ કર્મ ચ ચિન્તનમ્ ।
પ્રાણવચ્ચિન્તનં સર્વં સૃચ્યમાનજગન્મયમ્ ॥

યથાર્થ કર્મ યત્ તદ્ધિ વિચારો વ્યક્તતાં ગતઃ ।
વિજ્ઞા કાડપિ યતો લીલામારેભે હ્યાત્મસંવિદિ ।
દિવ્યાયાં, અત એવૈતદ્ વિદ્યતે પાર્થિવં જગત્ ॥

વિચારો નાસ્ત્યુપાદાનં સત્તાયા અનિવાર્યતઃ ।
નાપિ હેતુરસૌ તસ્યાઃ,સમ્ભૂતેઃ સાધનં તુ સઃ ॥

તદેવાહં ભવામીહ યત્પશ્યામિ નિજાન્તરે ।
।તત્સર્વં કર્તુમીશે યદ્ વિચારો માં વિનિર્દિશેત્ ।
પ્રભુસ્તદ્ ભવિતું યચ્ચ વિચારો વ્યઞ્જયેન્ મયિ-
ઇદૃષ્યવિચલા શ્રદ્ધા ધાર્યા પુંસા નિજાત્મનિ ।
યતો હિ ભગવાંસ્તસ્મિન્નન્તર્વસતિ સર્વદા ॥

નાસ્મત્કાર્યં સદાઽઽવૃત્તિઃ તસ્ય યન્ વા કૃતં પુરા ।

સમ્પ્રાપ્તિરેવ સિદ્ધીનાં નવ્યાનાં નનુ કર્મ નઃ ।
સ્વપ્નેऽપિ નૈવ દૃષ્ટાનામીશિત્વાનાં તથૈવ ચ ॥

કાલાશ્ચાત્મેહલોકશ્ચ ક્ષેત્રત્વેનાऽર્પિતા હિ નઃ ।
દૃષ્ટિરાશા તથા સ્રષ્ટ્રી કલ્પના પ્રેરિકાશ્ચ નઃ ।
સઙ્કલ્પ ચિન્તનાऽऽયાસા ઉપાયાઃ સર્વસિદ્ધિદાઃ ॥

કિન્નુ તન્નૂતનં યન્નઃ સાધ્યમધ્યાપિ વિદ્યતે?
પ્રેમ,કસ્માત્? યતોऽસ્માભિરદ્ય યાવત્તુ સાધિતાઃ-
કેવલં હિ ઘૃણા દ્વેષ સ્વાત્માસન્તોષવૃત્તય ।
જ્ઞાનં, કસ્માત્ ? યતોऽસ્માભિઃ સાધિતા હ્યધુનાવધિ-
ભ્રાન્તિરિન્દ્રિયસંવિત્તિઃ કલ્પનૈવ ચ કેવલમ્ ।
આનન્દોऽપિ, યતોऽસ્માભિઃ સાધિતાન્યધુનાવધિ-
કેવલં સુખં દુઃખમૌદાસીન્યં તથૈવ ચ ।
શક્તિશ્ચાપિ,યતોऽસ્માભિઃ સાધિતાતાન્યધુનાવધિ-
દુર્બલ્યઞ્ચૈવ ચેષ્ટા ચ જયશ્ચૈવ પરાજિતઃ ।
જીવનઞ્ચ, યતોऽસ્માભિઃ સાધિતાન્યધુનાવધિ-
જનનાન્દ્ વર્ધનઞ્ચૈવ મરણઞ્ચૈવ કેવલમ્ ।
એકત્વઞ્ચ,યાતોऽધ્યાપિ સાધિતૌ સઙ્ગસઙ્ગરૌ ।
દેવત્વં,સારતઃ; સ્વસ્મિન્ દેવમૂર્તે વિનિર્મિતિઃ ॥

## સદાનન્દમયમ્

બ્રહ્માસ્યાન્નિર્વિશેષઞ્ચેત્ નિરુપઞ્ચૈવ નિર્ગુણં
શશ્વન્નો મૂર્ત્તસત્તાયા દૃશ્યસત્યવિરોધિ ચ,
તદાऽસ્ય સકલસ્યાન્તો લય એવોચિતો ભવેત્ ।
વિચાર્યાઃ કિન્તુ સન્ત્યત્ર પ્રેમાનન્દાऽऽત્મસંવિદઃ ॥

વિશ્વમિદં નો કેવલમાસ્તે સૂત્રં હિ ગણિતસ્ય,
યત્સ્યાન્માનસિકાનાં કેષાઞ્જિન્નિર્વિશેષાણાં
સઙ્ખ્યા તત્ત્વાનીતિ ચ નામદ્વયકીર્તિતાનાં હિ
ભાવાનાં સમ્બન્ધં નિર્ધારયિતું પ્રયોક્તવ્યમ્,
યેન સ્યામ સમર્થાઃ સમ્પ્રાપ્તું હ્યન્તતઃ શૂન્યં,
કિં વા રિક્તમસારં નિતરાં નિર્વસ્તુકં હ્યેકમ્ ॥

નાપિ ચ વિશ્વમિદં ભો વ્યાપારઃ સ્થૂલભૌતિકો હ્યેવ,
યો બહુવિધશક્તીનાં સમીકૃતેર્વ્યઞ્જકોઽસ્તુ કસ્યાશ્ચિત્ ॥

કિન્તુ સ્વાત્મપ્રેમિણ આનન્દઃ સર્વમેવૈતત્ ।
અપિ વા સનાત નિશિઝોર્લીલા કસ્યાપિ ભતીયમ્ ॥

આત્મબહૂકરણં વાઽનન્તં શાશ્વતકવે હિ કસ્યાપિ ।
નિજનિઃ સીમિતસર્વાનશક્તેરુન્મદભરેણ મત્તસ્ય ॥

પરાત્પરોઽસૌ પુરુષો ગણિતજ્ઞઃ ઇવાસ્તિ સર્વમહાન્,
પ્રશ્નં સમાદપધઃ વિશ્વાત્મકમસ્તિ બહુરાશિમ્ ।
યદ્વા વિચારકોઽસૌ પરીક્ષણૈર્યઃ સમાદધાતીવ
તત્ત્વાનામિતરેતરસમ્બન્ધાનાં વિચારણાખ્યાં
મહાસમસ્યાં કિં વા સન્તુલનસ્યૈવ શક્તીનાં-
ઇત્યેવં વ્યાહર્તું વયમર્હામો યથાકામમ્ ।
કિન્ત્વિદમપિ વદનીયં યદસૌ પ્રેમીવ વર્તતે સુમહાન્
વૈશ્વ વ્યક્તિગતાનાં સ્વરસામ્યાનાં સુમયકશ્ચૈવ ।
અપિ વાઽસૌ શિશુરેકઃ કવિરિવ વાઽઽસ્તે સનાતનઃ કશ્ચિત્ ॥

નાલં તુ ચિન્તનાયાઃ પક્ષો જાત્વસ્તિ વિષયેઽસ્મિન્ ।
ગ્રાહ્યઃ સમગ્રરીત્યા હ્યાનન્દસ્યાપિ પક્ષોઽત્ર ॥

સત્તાશ્ચાપિ વિચારાસ્તત્વાન્યથ શક્તશ્ચ્યાપિ
સકલાન્યેવૈતાનિ હિ નિઃસારા રિક્તસઞ્જકાસ્તાવત્,।
યાવન્ન પૂરિતાનિ હિ ભાગવતાનન્દનિશ્વાસૈઃ ॥

સર્વેપ્યર્થાઃ પ્રતિમા એતે પ્રતિમૈવ કિન્તુ વિશ્વમિદમ્ ।
ભાવા બૃવન્ત્યમૂર્ત્તાઃ શુદ્ધવિચારં સવૈશસત્યાનામ્ ।
પ્રતિમાસ્તાવત્તેષાં વાસ્તવસત્તાં સજીવાં હિ ॥

આશ્વિષ્યન્તી શક્તિં વિજ્ઞા જનયાઞ્ચકાર ચેલ્લોકાન્,
તતઃ સમુત્પાદિતવાંસ્તામાનન્દો હિ સત્સ્વરુપસ્ય ।
યતો હ્યનન્તો દેવોઽમિતવિધમાનન્દનાત્મગર્ભેઽધાત્ ।
તત એવાજનિ જગતાં બ્રહ્માન્ડાનાં ચ સૃષ્ટિરખિલાનામ્ ॥

ચિદાનન્દૌ સતો હ્યાદ્યૌ જનકૌ જગતાં તતેઃ ।
એતાવેવાન્તિમે ચાપિ તત્ત્વે નૂનં પરાત્પરે ॥

અચૈતન્યં હિ મૂર્ચ્છેવ મધ્યગા ચેતનાત્મનઃ ।
અથવા સુન્તિરેવૈતત્ તસ્યાઽઽસ્તે તમસાવૃતા ॥

વેદનાઽઽત્મવિલોપો વા સત્ત્વાનન્દઃ સ કેવલં
યોઽપયાત્યાત્મનાઃ પ્રાપ્તું સ્વમેવાન્યત્ર ચાન્યથા ॥

આનન્દઃ સત્વરુપ્યસ્ય સીમિતો નાસ્તિ કાલતઃ ।
નૈવાસ્તિ તસ્ય કોઽપ્યન્તો ન ચાદિરપિ કશ્ચન ॥

રૂપાન્નિર્યાતિ વસ્તૂનામેકસ્માદ્ યન્મહેશ્વરઃ,
તત્ પ્રવેશાર્થમન્યસ્મિન્ રૂપે નવ્યે હિ કેવલમ્ ॥

કસ્તાવદીશ્વરો નામ? સોઽસ્ત્યેકઃ શાશ્વતઃ શિશુઃ ।
કુર્વાણઃ જ્ઞાશક્તાઽઽરામે લીલાં કામપિ શાશ્વતીમ્ ॥

## પુરુષઃ

પ્રભુર્નો પારયેત્ તયક્તુમાનર્તિ પ્રકૃતિં પ્રતિ ।
ન ચ શક્તો નરો હાતું સ્વામભીપ્સામમું પ્રતિ ॥

સમ્બન્ધોઽયમનન્તસ્ય સાન્તસ્ય ચ સનાતનઃ
અન્યોન્યસ્માદ્ધિ વૈમુખ્યં યાન્તૌ ભાતો યવા ત્વમ્ ।
સંયોગાય પ્રગાઢાય તત્ પરાવર્તનં તયોઃ ।
મનુજે પ્રકૃતિર્જગતે પુનરત્મસચેતના ભવતિ,
યેન નિજં ભોક્તારં પ્રતિ સા પ્રભવેત્ સુદૂરમુત્પલવિતુમ્ ।
અમુમેવાતૌ નિમૃતં ધત્તે હ્યજ્ઞાનપૂર્વકં સ્વાન્તઃ ।
અમુમેવાઽસ્મત્પ્રાણા નિજાન્તરે દધતિ ચૈન્દ્રિયા બોધાઃ ।
દધતોઽપિ નિષેધન્તિ પ્રતિષેધાન્તોઽપિ મૃપયન્તે ॥

સ્વં ન હિ વેત્તીત્યેવ પ્રકૃતિર્જયતો ન,વેત્તિ પરમેશન્ ।
જ્ઞાત્વૈવાત્માનમનસૌ જ્ઞાસ્યતિ હિ સતી વિશુદ્ધ્હમાનન્દં ॥

રહસ્યં પ્રાપ્તિરેકત્વે લુપ્તિરાત્મનાઃ
વિશ્વાતીતશ્ચ વિશ્વઞ્ચ વિશ્વેશો માનવસ્તથા
યદાન્યોન્યં વિજાનીતસ્તદૈકી ભવતો ધ્રુવં
વિભેદશ્ચાનયોર્નૂનમજ્ઞાનસ્યાદિકારણમ્,
યથાઽવિદ્યોતમજ્ઞાનં દુઃખસ્ય મૂલકારણમ્ ॥

આદૌ નરો માર્ગતિતાવદન્વક્ત્, ન વેદ ચાસૌ યદહં ગવેષયે
નિજં સ્વરૂપં નનુ દિવ્યમિત્યપિ યાત્રાં, યતો હ્યારભતે નિજામસૌ
જડાત્મિકાયાઃ પ્રક્તેસ્તમઃ સ્થિતેઃ ।
યદા પુનઃ-પ્રક્ર્તેઽવલોકિતુમ્,આન્ધ્યં તદાપ્યત્ર ચિરાય નિયતે
સ જ્યોતિષાન્તર્હ્રુદયે સમૃધ્યતા ।
પ્રત્યુત્તરં તસ્ય ગવેષણાવલેરસ્પષ્ટમેવ પ્રદદાતિ ચેશ્વરઃ ।
તસ્યાન્ધતાં મૃગ્યતિ ચાભિનન્દતિ માતેવ હસ્તૌ સ્વશિશોઃ પ્રસારિતૌ,
તાં માર્ગયન્તૌ તૃભિરેઽન્ધવત્ પ્રિયૌ ॥

ઈશ્વરપ્રકૃતી બાલૌ ક્રીડાપ્રેમરતાવિવ ।
દૃષ્ટમાત્રૌ નિલીયેતે અન્યોન્યસ્માચ્ચ ધાવતઃ ।
મૃગયેતામનુધાવ્યેતાં ગૃહ્યેતાં પુનરિત્યતઃ ॥

માનવોસ્તીશ્વરો યઃ સ્વં પ્રકૃતેર્ગોપયત્યલમ્,
યેન તાં સોઽધિકુર્વીત સંઙ્ઘર્ષેણાગ્રહેણ ચ,
પ્રયોગેણ બલસ્યાપિ સહસ્રાક્રમણેન ચ ।
ઈશ્વરો માનવો હ્યેવ વિશ્વાતીતશ્ચ વિશ્વગઃ,
ગૂહતે વ્ષ્ટિભાવાદ્ યઃ સ્વસ્માત્ સ્વં જીવવર્તિનઃ ॥

પશુ હિ માનવો નામ ચ્છન્નો યો લોમશત્વચા,
ચતુર્ષુ યશ્ચ પાદેષુ ભૂમૌ ભવતિ સંસ્થિતઃ ।
કીટોઽપિ માનવો નાં યઃ પ્રસપંશ્ચ સઙ્કુચન્
સ્વીયસ્ય માનવત્સ્ય વિકાસં પ્રતિ ગચ્છતિ ।
પ્રકૃતેરપિ રૂપાણિ સ્થૂલાનિ ચ જડાત્મનઃ
માનવા એવ દેહસ્ય પ્રાગ્વિકાસં સમાસ્થિતાઃ ।
સકલાન્યપિ વસ્તૂનિ "પુરુષા" ઽઽત્મકમાનવાઃ ॥

કો હ્યયં માનવો નામ? સોઽસ્ત્યાત્માઽજોઽવિનશ્વરઃ,
સ્વતત્ત્વૈ નિર્મિતે દેહે માનસે ચાસ્થિતોઽસ્તિ યઃ ॥

## પરિસમાપ્તિઃ

માનવેશ્વરયોર્યોગસ્યાભિપ્રાયઃ સદૈષ યત્
માનુષ્યે દિવ્યતાયાઃ સ્યાત્ સઞ્ચારોઽવ પ્રવેશનમ્,

માનવસ્ય ચ દેવત્વે ભવેવાત્મનિમજ્જનમ્ ॥

કિન્તુ તન્મજ્જનં નાસ્તિ લયરૂપં મનાગપિ ।
સર્વસ્યાન્વેષણસ્યાસ્ય સર્વવેગગણસ્ય ચ,
હર્ષોદ્રેકસ્ય દુઃખસ્ય નિર્વાણં નાન્તિમં ફલમ્ ।
અન્તોઽભવિષ્યદેતસ્યા લીલાયા અયમેવ ચેત્,
તદા તસ્યાઃ સમારમ્ભો ન કદાપિ વ્યધાસ્યત ॥

આનન્દ એવ વિશ્વસ્ય રહસ્યં પરમોત્તમમ્ ।
જાનીહિ શુદ્ધમાનન્દં જ્ઞાસ્યસે પરમેશ્વરમ્ ॥

કસ્તાવત્ સકલસ્યાદિરસ્યાર્થસ્થાભવત્ કિલ?
સદ્,યત્ સ્વં બહુધા ચક્રે સત્તાનન્દૈકલબ્ધયે,
વયધાચ્છ ગણનાતીતકોટિરૂપેષુ મજ્જનમ્,
યેનાઽસઙ્ખ્યવિધિત્વેન સ્વં પ્રાપ્તું પારયેત તત્ ॥

કશ્ચ મધ્યોઽસ્ય સર્વસ્ય? ભેદોઽસૌ વર્તતે કિલ,
યો બાહુલ્યમયૈકત્વલબ્ધયે યતતેતરામ્ ।
તદજ્ઞાનં ચ યત્ કૃચ્છ્રચેષ્ટારતમનારતં
યાતું વૈચિત્ર્યપૂર્ણસ્ય જ્યોતિષ્પૂરસ્ય સમ્મુખમ્ ।
તદ્ દુઃખં ચાપિ યત્ કષ્ટકરાયાસં નિષેવતે
અકલ્પ્ય-પરમાનન્દ-સંસ્પર્શસ્યોપલબ્ધયે ।
યતો હ્યેતાનિ વસ્તૂનિ સન્તિ સર્વાણિ મૂર્તયઃ
અન્ધકારાત્મિકા નૂનં સ્પન્દના વિકૃતાસ્તથા ॥

કશ્ચાન્તોઽસત્યસ્ય સર્વસ્ય? મધુ શક્તં ભવેદિવ
સ્વાદિતું સ્વં સ્વબિન્દૂંશ્ચ યુગપત્ સકલાંસ્તથા,
ઈશતાં સ્વાદિતું સર્વેઽન્યોન્યં તસ્ય ચ બિન્દવઃ,
તેષુ ચાત્મતયૈકૈકો મધુકોશં તથઽખિલમ્ ।
ઈદૃગેવેશ્વસ્મેહ તથા ચ માનવાત્મનઃ
ભુવનસ્યાપિ ચૈતસ્ય ભવેત્ પરિણતિર્ધ્રુવમ્ ॥

પ્રેમ સ્વરઃ પ્રધાનોઽત્રાઽઽનન્દઃ સઙ્ગીતસ્મિતિ ચ ।
શક્તિસ્તાનસ્તયા જ્ઞાનં ગાયકં વર્તતે કિલ ॥

અનન્તો યશ્ચ સર્વાત્મા કર્તા શ્રોતા ચ સોઽત્ર હિ ।
વિસ્વરાનેવ સંવિગ્નઃ સમ્પ્રત્યારમ્ભિકાન્ વયં ।

તે તથા ભીષણા ભવ્યા યથા સ્યાત્ સ્વરસઙ્ગતિઃ ।
પરં ભાગવતાનન્દરાશેઃ પ્રોચ્છલમૂર્ચ્છનાં
પ્રખરાં વયમાપ્સ્યામો નાત્ર સ્વલ્પોઽપિ સંશયઃ ॥

## બન્ધનશૃઙ્ખલમ્

સ્પૃહયાલુ જગત્સર્વં સ્વાતન્ત્ર્યાવાપ્તયે કિલ ।
તથાપિ પ્રાણિનાં સ્વાનિ બન્ધનાનિ પ્રિયાણ્યહો ॥

વિરોધાભાસ એવાયં પ્રથમઃ પ્રકૃતે હિ નઃ ।
ગ્રન્થિશ્ચ યો ન કસ્યાપિ સમુન્મોચ્યઃ કથઞ્ચન ॥

પ્રિયાણિ માનવસ્યેહ બન્ધનાનિ હિ જન્મનઃ ।
તત્સઙ્ગિબન્ધનેષ્વસ્માન્મૃત્યોરપ્યેષ ગૃહ્યતે ॥

સ્વસત્તામુક્તિમેતેષુ સોઽભીપ્સુઃ શૃઙ્ખલેષુ ચ
પ્રભુત્વં ચ તથા સ્વાત્મપૂર્ણતારુપમપ્યલમ્ ॥

માનવસ્ય પ્રિયા શક્તિરતોઽશક્તેર્વશેઽસ્ત્યાસૌ ।
સંસારોઽયં યતઃ શક્તેસ્તરઙ્ગાણાં હિ સાગરઃ,
યેઽન્યોન્યં મિલિતાસ્તીવ્રં સમાઘ્નન્તિ નિરન્તરમ્ ।
આરુરુક્ષેદ્ધિ યઃ સાનુમૂર્મેરેકસ્ય માનવઃ,
ભાવ્યં વીચિશતાઘાતૈસ્તેનાચેતેન નિશ્ચિતમ્ ॥

સુખં હિ સુપ્રિયં પુંસો વર્તતે યૂથિવીતલે ।
કષ્ટક્લેશભરસ્તેનાઽવશ્યવાહ્યો ભવત્યતઃ ।
મુદ્ વિશુદ્ધા હિ મુક્તાય વિરાગાયૈવ ચાત્મને ॥

તત્ત્વં યન્ માનવાન્તઃસ્થં સમન્વેષયતે સુખં
તદ્ દુઃખભોગિની કાચિચ્છક્તિશ્ચાતિપ્રયાસિની ॥

માનવઃ ક્ષુધિતઃ શાન્ત્યૈ,તૃષિતોઽપ્યનુભૂતયે
વ્યાકુલસ્ય ચ ચિત્તસ્ય વિક્ષુબ્ધહૃદયસ્ય ચ ।
ભોગસ્તન્મનાસો ભાતિ સ્વર એવ હિ કેવલમ્ ।
શાન્તિશ્ચ જડલાઽત્યન્તા ભાતિ નીરસતા તથા ॥

પ્રિયાઃ સ્વસ્થૂલસત્તાયાઃ સીમાનો મનુજન્મનઃ ।

તથાપીપ્સુઃ સ મુક્તિં સ્વાઽનન્તસ્વાનન્તાઽમૃતાત્મનોઃ ॥

અદ્ભૂતાકર્ષણં ચૈષુ વિરોધેષ્વનુભૂયતે
તસ્યાન્તઃસ્થિતસ્ત્વેન રસકામેન કેનચિત્ ।
તસ્ય માનસસતાયિ સુચિત્રં જીવનસ્ય તે ॥

ન કેવલં હિ પીયૂષં પરન્તુ વિષમપ્યહો
સમીકર્ષતિ તસ્યાભિરુચિં ચાપિ કુતૂહલમ્ ॥

અસ્ત્રૈવૈષાં ચ વસ્તૂનાં સમસ્તાનાં પ્રયોજનમ્ ।
વિરોધાનાં ચ સર્વેષાં સમાધાનં હિ વર્તતે ॥

સંયોગેષુ પ્રકૃત્યાઃ સ્યાત્ કામમુન્માદપૂર્ણતા,
કિન્તુ તત્ર ભવત્યેવ તસ્યાઃ કાચન યોજના ।
ગ્રન્થીનામત્યમોચ્યાનાં તસ્યાશ્ચાસ્તિ સમાહિતિઃ ॥

મૃત્યૂર્હિ પ્રકૃતેઃ પ્રશ્નો જીવનં પ્રતિ સન્તતં
ક્રિયતે યસ્તયા,યેન તચ્ચ સંસ્મારયત્વસૌ-
નાદ્યાપિ તેન સમ્પ્રાપ્તં સ્વરુપં નિજમિત્યહો
મૃત્યોશ્ચેન્નાવરોધઃ સ્યાત્ પ્રાણી બદ્ધો ભવેત્સદા
આકારેઽપૂર્ણતાગ્રસ્તજિવનસ્ય સુનિશ્ચિતે ॥

મુત્યુનાનુસૃતઃ પૂર્ણં-જીવનં પ્રતિ બુધ્યતે ।
તસ્ય મૃગ્યતિ શક્યત્વમુપાયાંશ્ચાપ્યસૌ તતઃ ॥

દૌર્બલ્યં કુરુતે પ્રશ્નં શક્તીઃ પ્રતિ તમેવ નઃ
તા મહત્તાસ્તથોર્જા નો યાભિઃ સ્મો ગર્વિતા વયમ્ ।
પરીક્ષાં ચાપિ તત્તાસાં કુરુતે હિ તથાવિધામ્ ॥

શક્તિર્લીલાવિલાસોઽસ્તિ જીવનસ્ય હિ કેવલમ્ ।
સા ચ દર્શયતેઽસ્મભ્યં માત્રાં તસ્ય યથાયથમ્ ।
દૌર્બલ્યં વર્તતે લીલા મુત્યીરેવેહ કેવલં ?
જીવનસ્ય ગતીઃ સર્વા યોઽનુધાવતિ સન્તતમ્,
પ્રબલં નિર્દિશત્યસ્ય પ્રાપ્તશક્તેસ્તથાઽવધિમ્ ॥

દુઃખં ચ વેદના ચેતિ સાધને પ્રકૃતેરુભે,
યદ્ દ્વારા નોઽનન્તરાત્માનમેતત્ સંસ્મારયત્યસૌ
યત્ મુખં તેન લોકેઽસ્મિન્ યત્કિમપ્યુપભૃજ્યતે,

સત્તાયા વાસ્તવાનન્દમન્દસઙ્કેત એવ તત્ ॥

પીડાયાં યાતનાયાં ચ પ્રત્યેકં જીવનસ્ય નઃ
અસ્તિ હર્ષાતિરેકસ્ય રહસ્યં ગુપ્તમર્થિષઃ,
સુખાનિ નો મહિષ્ઠાનિ વિભાન્તિ યદપેક્ષયા
કેવલં મન્દમમન્દાતિલોલલોલાઃ શિખા ઇવ,
એતદેવ રહસ્યં તત્ યેનાત્માऽऽકૃષ્યતે હિ નઃ
મહતીર્વેદનાશ્ચાગ્નિપરીક્ષાશ્ચાપિ દારુણાઃ,
જીવવસ્યાનુભૂતીશ્ચ ભીષણાઃ પ્રતિ ભૂયસા,
સ્નાવિરં નો મનો યાભ્યઃ સત્રાસં સમ્પલાયતે ॥

સત્તાયાં સક્રિયાયાં નસ્તથા તત્કરણેષ્વપિ
ચાગ્ચલ્યં સગ્ચરો યશ્ચ સદ્યઃક્લાન્તે વિલોક્યતે,
પ્રકૃત્યા ક્રિયચ્યિમાણોऽસૌ સઙ્કેતો યેન સૂચ્યતે-
શાન્તિર્નો વાસ્તવાધારઃ સઙ્ક્ષોભશ્ચાત્મનો રુજા ॥

કેવલાયાઃ પ્રશાન્તેર્યા વન્ધ્યતા ચૈકરૂપતા,
પ્રકૃતેરિઙ્ગિન્તે તે સ્તો યાભ્યામેતત્ તયેઙ્ગ્યતે-
કર્મલીલા તયા તત્ર દૃઢાધારેऽસ્મદિષ્યતે ।
શશ્વલ્લીલાં કરોતીશો ન જાતુદ્વિજતે તુ સઃ ॥

અસ્મદ્દેહસ્ય સીમનો વિદ્યન્તે સગ્ચકોપમાઃ ।
સ્વસત્તા તાસુ નિક્ષેપ્યા મનસા નસ્તયાત્મના ।
ભગ્જનીયાસ્તતસ્તાશ્ચ પરિણમ્યાઃ પુનઃ પુનઃ
સીમાસુ સુવિશાલાસુ સુવિશાલતરાસુ ચ,
યેન દેહસ્ય સાન્તસ્માપ્યાનન્ત્યસ્યાત્મચિત્તયોઃ
સામગ્જસ્યાવહં સૂત્રં ભવેત્સમ્પ્રાપ્તમન્તતઃ
સ્વાતન્ત્ર્યં નામ સત્તાયાસ્તસ્ય ધર્મોऽસ્તિ કેવલં
નિજાનિઃસીમિતૈકત્વસ્વરૂપે યા પ્રતિષ્ઠિતા ।
સ્વામિ તત્ પ્રકૃતેર્ગુપ્તં સમસ્તાયાશ્ચ વર્તતે ॥

દાસ્તવં નામ સત્તયાઃ પ્રેમધર્મોऽન્તરસ્થિતઃ,
યેનાત્મનોऽન્યરુપાણાં સત્તાનેકત્વવર્તિનાં
લીલાયામર્પયત્યેષા સ્વં સાહ્યાર્થં નિજેચ્છયા ॥

સ્વાતન્ત્ર્યં કુરુતે કાર્યં બન્ધનેષુ યદા નિજં

દાસત્વં ચ યદા સ્વીયાં વિમુચ્ય પ્રેમધર્મતાં
બલાત્કારસ્ય શક્તેશ્ચ ધર્મતામુપગચ્છતિ,
તદૈવ પ્રકૃતિઃ સત્યા વિકૃતિં યાતિ વસ્તુનઃ,
અનૃતસ્યાધિપત્યં ચ પ્રાબલ્યેન પ્રવર્તતે
વ્યવહારેષુ સર્વેષુ જીવનેન સહાત્મનઃ ॥

પ્રકૃતિ વિકૃતેરસ્યાઃ કાર્યમારભતે નિજમ્ ।
લીલાં કરોતિ સા પૂર્વં સંયોગૈઃ સકલૈશ્ચ તૈઃ
યેઽપ્યુદ્ભાવયિતું શક્યા વિકૃત્યા જગતીતલે,
તવનન્તરમેવાસ્યાઃ સંસ્કારં ચાનુમન્યતે ॥

સંયોગાનાં તતશ્ચૈષાં સારં સઙ્ગૃહ્ય સાઽખિલં
વ્યનક્તિ શ્રીમયં નવ્યં પ્રેમમુક્ત્યોઃ સમન્વયમ્ ॥

એકત્વાદપરિચ્છેદ્યાત્ સ્વાતન્ત્ર્યમભિજાયતે,
તદેવ વિદ્યતેઽસ્માકં સત્તા વાસ્તવિકી યતઃ ।
પ્રભવામો વયં પ્રાપ્તું સારં તસ્ય નિજાત્મનિ ।
સ્થાપયિત્વા તથૈકત્વં સર્વૈરન્યૈઃ સહાત્મનઃ,
તસ્યાનુભવિતું શક્યા લીલાપ્યસ્મિન્ મહીતલે ।
દ્વિવિધાનુભવસ્યાસ્ય પ્રાપ્તિરેવ પ્રયોજનં
સમસ્તમાત્મનોઽસ્માકં વસતઃ પ્રકૃતાવિહ ॥

અનુભૂય તદેકત્વં સીમાતીતં નિજાન્તરે
સ્વાર્પણં જગતે મુક્તિઃ પરા સામ્રાજ્યમક્ષયમ્ ॥

સન્તોઽનન્તા વયં મુક્તા ભવામો મૃત્યુપાશતઃ ।
જીવનં જાયતે લીલા તદાનીં નોઽમૃતાત્મનઃ ॥

પ્રાપ્નુમશ્ચ વયં મુક્તિ તદા દૌર્બલ્યબન્ધનાત્,
ભવામો હિ યતોઽખણ્ડસિન્ધુરૂપા વયં તદા
દૃષ્યન્તઃ સ્યોર્મિમાલાનામાઘાતાસઙ્ખ્યકોટિભિઃ ॥

ભવામશ્ચ તદા મુક્તાઃ શોકસન્તાપસન્તતેઃ,
શિક્ષામહે વયં સ્રષ્ટું સામઞ્જસ્યં યતોઽખિલૈઃ
વસ્તુભિઃ સહ સત્તાયાઃ સ્વસ્યાસ્તત્સ્પર્શકારિભિઃ,
દ્રષ્ટું ચાર્થેષુ સર્વેષુ ક્રિયાં ચાપિ પ્રતિક્રિયા-
માનન્દસ્યૈવ સત્તાયા વિલસન્તીમનારતમ્ ॥

મુચ્યામહે ચ સીમાભ્યો દેહો નો જાયતે યતઃ
ક્રીડાદ્રવ્યમનન્તસ્ય માનસસ્ય કૃતે તદા ।
શિક્ષતે ચાનુસર્તું સ સઙ્કલ્પમમૃતાત્મનાઃ ॥

મુક્તાઃ સ્મશ્ચ હૃદઃ સ્નાયુમાનસસ્ય જ્વરાત્ તયા ।
નૈવ બધ્યામહે કિન્તુ નિષ્ક્રિયત્વેન કર્હિચિત્ ॥

અમૃતત્વં તથૈકત્વં સ્વાતન્ત્ર્યં સન્તિ નોઽનન્તરે,
ક્રિયમાણાં પ્રતીક્ષન્તે ચાસ્માભિઃ સ્વગવેષણામ્ ।
કિન્તુ પ્રેમોદ્ભવાનન્દકૃતે નોઽનન્તઃસ્થિતઃ પ્રભુ-
ર્નાનારુપસ્તદાપ્યત્ર સ્થાસ્યત્યેવ સુનિશ્ચિતમ્ ॥

## ચિન્તનાશ્ચ ચિદુન્મેષાઃ

વિશ્વાસમીશ્વરીયેઽત્ર વિધાને સવિશષેકે
યદ્વા ભગવતો હસ્તયન્ત્રત્વબુદ્ધિમાત્મનિ
ધાર્ષ્ટ્યમાત્રં વિદન્ત્યેકે પરં પ્રેક્ષામહે વયં-
"વિધાનં દિવ્યમસત્યેવ વિશિષ્ટં પ્રતિમનવં
ઈશ્વરશ્ચાલયત્યત્ર કુદ્દાલં શ્રમિણાં સ્વયમ્,
સ એવ ચ શિશોરાસ્યે લઘોર્ગદ્ગદયત્યલમ્" ॥

"વિધાનં" કેવલં તન્ન યન્માં રક્ષતિ મજ્જનાત્
પોતભઙ્ગે તયાભૂતે સર્વેન્યે યત્ર મજ્જિતાઃ ।
તદપ્યૈશં વિધાનં યત્ સર્વાનન્યાન્ સુરક્ષતિ,
કિન્ત્વાચ્છિનતિ રક્ષાયાઃ ફલકં યન્મમાન્તિમં
માં ચ મજ્જયતેઽપારે પારાવારે ચ નિર્જને ॥

આનન્દો વિજયસ્યાલ્પતરો ભાતિ કદાચન
અકાર્ષણાદ્ધિ દુઃખસ્ય સઙ્ઘર્ષસ્ય તથૈવ ચ ।
તથાપિ જયમાલૈવ જિષ્ણવે માનવાત્મને
ઇષ્યતે લક્ષ્યરૂપેણ ન તુ શૂલાધિરોપણમ્ ॥

આત્માનોઽભીપ્સયા રિક્તા વિફલાઃ કૃતયો વિભોઃ ।
પ્રકૃતિઃ પ્રીયતે તૈસ્તુ તેષાં બાહુલ્યમિચ્છતિ ॥

યતસ્તે સ્યાયિતાં તસ્યા દૃઢયન્તિ સુનિશ્ચિતમ્ ।
ચિરજીવિ ચ સામ્રાજ્યં તદીયં કુર્વતેતરામ્ ॥

યે સન્તિ નિર્ધના અજ્ઞા અકુલીનાઃ કુવૃત્તયઃ
ન હિ તે પ્રાકૃતા લોકાઃ,પ્રાકૃતાઃ સર્વ એવ તે
યે ક્ષુદ્રત્વેન સન્તુષ્ટાઃ સામાન્યમાનુષેણ ચ ॥

સાહ્યં કુરુ નૃણાં કિન્તુ તચ્છક્તિં હ્રાસયસ્વ નો ।
કામં કુરુષ્વ તેષાં ત્વં શિક્ષણં માર્ગદર્શનં
અવધેહિ પરં તેષામક્ષુણ્ણા તિષ્ઠતાત્ સદા
કાર્યોપક્રમશક્તિશ્ચ મૌલિકી પ્રતિભાઽપિ ચ ॥

આત્મન્યન્તર્થ તાનન્યાંસ્ત્વં કુરુષ્વ। પરં શ ૃણુ-
તેભ્યસ્તત્પ્રકૃતેઃ પૂર્ણં દેવત્વં પ્રતિદેહ્યલમ્ ।
કર્તું યઃ શક્નુયાદેવં સ નેતા ચ ગુરુશ્ચ સઃ ॥

ઈશ્વરોઽરચયદ્ વિશ્વં યુદ્ધક્ષેત્ર તવાઽખિલં
અપૂરયચ્ચ તચ્ચણ્ડૈર્યોદ્ધ્રુણાં પદર્ગ્જૈ (?)
સિંહનાદૈસ્તથાત્યુગ્રસઙ્ઘર્ષ મલ્લયુદ્ધ્હયોઃ ॥

કિં યૂયમિચ્છુકા હર્તું તસ્ય શાન્તિમનામયાં
અપ્રદાયૈવ તન્મૂલ્યં યત્ તસ્યાસ્તેન નિશ્ચિતં ?
આપાતપુર્ણસાફલ્યે વિશ્વાસો ન વિધીયતાં
યદા લભ્ધવાપિ સાફલ્યં કર્તવ્યં ભૂરિ દૃશ્યતે,
તદા પ્રફુલ્લચિત્તેન પુરો ધાવ્યં ત્વયા પથિ,
યતો વાસ્તવસંસિદ્ધિર્દીર્ઘાયસમપેક્ષતે ॥

માર્માઽવસ્થાવિશેષસ્ય લક્ષ્યત્વેન ગ્રહો હિ યઃ
સુચિરાવસ્મતિર્વા યા ક્વચિદ્ વિશ્રામધામનિ,
સ્ત્વસ્તમ્ભકરી ભ્રાન્તિર્ન હિ કાપિ તતોઽધિકા ॥

યત્ર ક્વાપિ મહાન્તં ત્વં પશ્યેરન્તમવેહિ તં
લક્ષણં મહતઃ કસ્યાપયારમ્ભસ્ય ભવિષ્યતઃ ।
વિધ્વંસો દારુણો ભિમપ્રમાણો યત્ર પીડકઃ
ભાયયેત્તે મનસ્તત્ર સાન્ત્વયૈતદ્ ગિરાનયા
યત્ સૃષ્ટિર્મહતી કાપિ બૃહતી ભાવિની ધ્રુવમ્ ॥

નેશ્વરઃ કેવલં મન્દે નિસ્પન્દે ચાન્તરધ્વનૌ ।
પરં વહ્નૌ ચ વાત્યાયામપ્યસૌ વર્તતે ધ્રુવમ્ ॥

યથા યથા ભવેદ્ વિશ્વે વિધ્વંસઃ સુમહત્તરઃ,
સુયોગાઃ સુતરાં મુક્તાઃ સર્ક્તસ્ય તયા તથા ॥

દીર્ઘો ભાતિ પદં ધ્વંસો મન્ત્રઃ પ્રાયશ્ચ પીડકઃ ।
મન્થરશ્ચોદ્ભવઃ સૃષ્ટેર્જયોઽસ્યા વિઘ્નસન્કુલઃ ॥

ભૂયો ભૂયો નિશાઽઽયાતિ દિવસશ્ચ વિલમ્બતે,
અથવા પ્રતિભાત્યેવ મિથ્યાભૂતાઽરુણોદયઃ ।
તેન મા સ્મ નિરાશો ભૂઃ સાવેક્ષં કુરુ કર્મ તુ ॥

ક્ષિપ્રં ભવન્તિ ભગ્નાશાઃ પ્રચણ્ડાશાજુષો જનાઃ ।
નાશાં કુરુ ભયં નાપિ વિશ્વાસં ધારય સ્થિરં
પ્રયોજને પ્રભોઃ સિદ્ધિ સઙ્કલ્પે ય નિજાત્મનઃ ॥

હસ્તો દિવ્યકલાકર્તુરવિશ્વસ્ત ઇવાત્મનઃ
સામયથા(?) પ્રતિભાયાઞ્ચ સ્વકર્મ કુરુતેઽસકૃત્ ।
ભાત્યેવં યત્ પદાર્થાન્ સ સમાદાય પરીક્ષતે ।
સન્ત્યજ્ય તાંસ્તતશ્ચાન્યાનુદ્ગૃહ્ણાતિ ક્ષિપત્યથ ॥

ઉદ્ગૃહ્ણાતિ ચ તાન્ ભૂયો યતતે વિફલાયતે ।
તાનન્તે પ્રતિસન્ધાય સંયુનક્તિ પરસ્પરમ્ ॥

યાવન્ન સર્વવસ્તૂનિ સમ્પ્રયાન્તિ સુસજ્જતાં
તાવદ્ ભગવતઃ કાર્યપદ્ધતિઃ પરિલક્ષ્યતે
અપ્રત્યાશિતવૃત્તૈશ્ચ નૈરાશ્યૈશ્ચાભિપૂરિતા ।
વૃતમાસીદ્ વદારમ્ભે તદન્તે વિનિપાત્યતે
હેયતાયા ગભીરે ચ તલંહીને ચ। ગહ્વરે ।
યચ્ચાભૂત્ સમ્પરિત્યક્તં જાયતે તત્તું સામ્પ્રતં
દ્રુઢાધારશિલા કસ્યચિદ્વિશાલસ્ય વેશ્મનઃ ।
પરં સર્વસ્ય મૂલેઽસ્યામોઘા દ્રુષ્ટિર્વિભાસતે
જ્ઞાનસ્ય સમતીતસ્ય તર્કબુદ્ધિં તનૂભૃતામ્,
સ્મિતં મન્દમનન્તસ્ય સામર્થ્યસ્ય ચ કસ્યચિત્ ॥

ઈશ્વરસ્ય પુરઃ કાલઃ સર્વોઽપિ સમુપસ્થિતઃ ।

તતો નાપેક્ષિતા તસ્ય ત્વરા કર્મસુ સર્વદા ॥

નિશ્ચયાત્મા નિજે લક્ષ્યે સાફલ્યે ચ સ વર્તતે ।
ન ચિન્તા તસ્ય કાયં સ્વં ધ્વંસ્યં સ્યાચ્છત શોઽપિ ચેત્
નેદીયઃ પૂર્ણ સંસિદ્ધેરાનેતુમુત્તરોત્તરમ્ ।
ધૈર્યં નઃ પ્રથમઃ,પાઠઃ મહાનાવશ્યકશ્ચ યઃ,
કિન્તુ તન્નામ નો, ભીરોર્ગતિમાન્ધં જડાત્મકમ્,
નાપિ સંશમશીલસ્ય શ્રાન્તસ્યાપ્પલસ્ય વા,
ન ક્ષુદ્રાકાઙ્ક્ષિનશ્ચાપિ (?) ન]ચાત્યન્તાબલાત્મનઃ ।
ધૈર્યં નામ તદેવ સ્યાદ્ યત્ સામર્થ્યેન સમ્ભૃતં
પ્રશાન્તેન સ્થિરેણાથ સંહતેનોત્તરોત્તરમ્ ।
જાગરુકતયાત્માનં તત્ સુસજ્જયતેતરાં
મુહૂર્તાય પ્રહારાણાં મહતાં ક્ષિપ્રપાતિનામ્,
સ્વલ્પાનામપિ શક્તાનાં નિયતેઃ પરિવર્તને ॥

કુતો દેવો જગત્ સ્વીયં ઘનૈરાહન્તિ ભીષણમ્,
કત્વા પાદતલાક્રાન્તં મૃદ્નાતિ ગુણ્ડિકોપમં ૧
કુતશ્ચ સ્નપયત્યેતદ્રક્તનદ્યાં પુનઃ પુનઃ,
ક્ષિપતે નારકે ચાગ્નિકુણ્ડે પ્રજ્વલિતેઽરુણે?
યતો માનુષમદ્યાપિ હીનધાતુઃ સમષ્ટિશઃ,
કુત્સિતશ્ચ કઠોરશ્ચાસંસ્કૃતશ્ચાપિ સર્વથા
ન યો દ્રાવયિતું શક્યો ન રૂપયિતુમન્ધતા ।
સામગ્રી યાદ્રુશી તસ્ય તાદૃશી કાર્યપદ્ધતિઃ
સાહાય્યં ચેદિયં કુર્યાત્ પ્રાપ્તું પરિણતિં નિજાં
ધાતૌ શ્રેષ્ઠતરે શુદ્ધતરે ચાપિ યથાક્રમં
તદા તદ્વ્યવહારસ્ય રીતિરપ્યેતયા સહ
ભવેન્મૃદુતરા નૂનં તથા ચ મધુમત્તરા,
પ્રયોગોઽસ્યાસ્તથા ચારુતરશ્ચોચ્ચતરો ભવેત્ ।
કુતો વવે સ સામગ્રીમીદ્રુશીં નિર્મમેઽપિ વા
યદાસન્ત્સસમુખં તસ્ય વરણાર્થમુપસ્થિતાઃ
સમ્ભાવના ઉપાદાનદ્રવ્યરાશેરસીમિતાઃ ?
હેતુરસ્યાભવત્ તસ્ય દિવ્યા ચિન્મયચેતના?
અપશ્યત્ સ્વસમક્ષં યા ત્રયમેતન્ન કેવલં-

સૌન્દર્યાઞ્ચપિ માધુર્યમથ પાવિત્ર્યમેવ ચ,
પરં શક્તિઞ્ચ સઙ્કલ્પં મહત્તાં પરમામપિ ॥

માઽવહેલય શક્તિં ત્વં માપિ પ્રેક્ષ્ય કુરૂપતાં
આકૃતીનાઞ્ચ કાસાઞ્ચિત્ તસ્યાસ્તસ્યાં ઘૃણાં કુરુ કૃ
માપિ ચિન્તય ચૈતદ્ યત્ પ્રેમૈવ પરમેશ્વરઃ ।
પૂર્ણસિદ્ધિષુ સર્વાસુ કલા કાચિદપેક્ષિતા
સત્ત્વસ્ય શૂરવીરસ્ય મહતોઽપ્યસુરસ્ય ચ ।
પરં મહત્તમાત્કષ્ટાદ્ ભવુઞ્છોક્તિર્મહત્તમા ॥

સર્વં હિ પરિવર્તેત સ્વીકુર્યાન્માનવો યદિ
સત્તાયાઃ સ્વાત્મનોઽધ્યાત્મરૂપે પરિણતિં સકૃત્ ।
પરં તત્પ્રકૃતિઃ સ્મૃલદેહ-પ્રાણ-મનોમયી
વિદ્રોહિણી વિધાનસ્ય ભવત્યુચ્ચતરસ્ય હિ ।
આત્મનોઽપૂર્ણતાયાં સ નિતરામનુરાગવાન્ ॥

સત્સ્વરુપં સતોઽસ્માકમાત્મૈવાસ્તે સનાતનઃ ।
દેહઃ પ્રાણો મનો યાવત્ ભજન્તેઽપૂર્ણતાં નિચામ્,
તાવદાવરણાન્યસ્ય ભવન્ત્યેતતાનિ કેવલમ્ ।
પ્રાપ્તાનિ પૂર્ણતાઞ્ચાસ્ય સઞ્ચાઃ સ્યૂ રૂપદાયકાઃ
અધ્યાત્મભાવસમ્પ્રાપ્તિર્ન પર્યાપ્તા તુ કેવલા ।
એતેન કેચિદાત્મનઃ-સજ્જાઃ સ્યુઃ સ્વર્ગસિદ્ધયે ।
પરં સ્થાસ્યતિ ભૂલોકો યથાપૂર્વં હિ ભૂયસા ।
નાપ્યત્ર સાધનં મુક્તેર્મ ધ્યમાર્ગાવલમ્બનમ્ ॥

વિશ્વં પરિચિતં ક્રાન્ત્યા ત્રિપ્રકારિકયા કિલ ।
તત્રૈકા ભૌતિકી યસ્યાઃ પરિણામા મહૌજસઃ,
નૈતિકી બૌદ્ધિકી ચાન્યા ક્ષેત્રં યસ્યા બૃહત્તરમ્,
યત્ફલાનિ તથાનન્તગુણમૃદ્ધતરાણિ ચ,
આધ્યાત્મિકી તુ બીજાનાં વપનં સુમહીયસામ્ ॥

ત્રેધા પરિણતિઃ સ્યાચ્ચેત્ સમં ચાથ સુસઙ્ગન્તમ્,
તદાનીમેવ નિર્દોષં કાર્યં સર્વં ભવિષ્યતિ ।
કિન્તુ મનશ્ચ દેહશ્ચ નૂજાતેર્ધર્તુમક્ષમે
તીવ્રમાધ્યાત્મિકં હ્યન્તઃપ્રવાહં પૂર્ણરુપતઃ ।

ભૂયાનંશઃ સ્રવત્યસ્ય બહિર્યશ્ચાવશિષ્યતે
તસ્યાધિકતરો ભાગો વિકૃતિં સમ્પ્રયાત્યલમ્ ।
ફલમધ્યાત્મબીજાનાં નપનાદ્વિપુલાદ્યાદિ
ઇષ્યતે સ્વલ્પમપ્યત્ર, તદા સ્યુઃ? સમપેક્ષિતાઃ
અસ્મત્ક્ષેત્રસ્ય બૌદ્ધિક્યો ભૌતિક્યોઽનેકકૃષ્ટયઃ ॥

પ્રત્યેકં કૃતવાન્ ધર્મો મનુજાતેઃ સહાયતામ્ ।
પુપોષ પુંસિ સૌન્દર્યજ્યોતિ ધર્મો હિ "પૈગનઃ",
બૃહતાં ચ તદીયસ્ય જીવનસ્ય સમુચ્ચતામ્,
તલ્લક્ષ્યં બહુપક્ષીયપૂર્ણતાયાસ્તથૈવ ચ ॥

ધર્મશ્ચ યીશવીયસ્તં કારયામાસ ભૂતલે
પ્રેમકારુણ્યયોરીષદ્દર્શનં હીશ્વરીયયોઃ ।
બૌદ્ધધર્મોઽદવંશત્તં પ્રશસ્તં પથમીદૃશં
યેનાસૌ સુતરાં પ્રાજ્ઞઃશુચિઃ સૌમ્યૌ ભવેદ્,ભુવિ ।
યહૂદીસ્લામધર્મૌ ચ તમદીદૃશતામિદમ્-
કથં કર્મણિ નિષ્ઠાવાન્ સ્યાદસૌ ધર્ભભાવતઃ,
સોત્સાહમર્પિતો ભક્ત્યા ભવેચ્ચ ભુવનેશ્વરે ।
હિન્દુધર્મશ્ચ સમ્ભાવ્યાઃ સમ્પદઃ સુબૃહત્તમાઃ,
આધ્યાત્મિકી; સુગમ્ભીરતમા વ્યાવૃત્ત તત્પુરઃ ।
મહત્કાર્યં ભવેત્સિદ્ધં દર્શનાનીશ્વરસ્ય ચેત્
સર્વાણ્યેતાનિ કુર્વીરન્ સમાશ્લેષં પરસ્પરમ્,
ક્ષિપત્વા ચાત્માનમેકસ્મિન્નૈક્યમાયાન્તુ સઞ્ચકે ।
પરં માર્ગેઽન્તરાયૌ સ્તો મહાન્તૌ દ્વાવિમૌ ખલુ-
બૌદ્ધિકૌ મતવાદશ્ચાહમ્ભાવઃ સામ્પ્રદાયિકઃ ॥

ધર્માઃ સર્વેઽપ્યનેકેષામુદ્ધારં વ્યપધુરાત્મનામ્,
કિન્તુ નૈકોઽપિ હન્તૈષામદ્ય યાવદભૂત્ ક્ષમઃ
કર્તુમાધ્યાત્મિકીં સર્વાં મનુજાતિં મહીતલે ।
નાપેક્ષિતસ્તદર્થન્તુ સમ્પ્રદાયો ન વા મતમ્,
પરં યત્નો નિજાધ્યાત્મવિકાસાર્થં નિષેવિતઃ,
મો ભવેદનવચ્છિન્નઃ સર્વગ્રાહી ચ સુસ્થિરઃ ॥

યાન્યદ્ય લોકે પરિવર્તનાનિ પ્રવર્તનાનાનિ વિલોકયામઃ

તાન્યાત્મનો ધ્યેયવિશેષબુદ્ધ્યાઽઽવર્શસ્ય વ દૃષ્ટ્યાપિ ચ બૌદ્ધિકાનિ,
સન્ત્યેવ વા નૈતિકભૌતિકાનિ ॥

પ્રતીક્ષતે કાન્તિરથાદ્ય યાવદાધ્યાત્મિકી સ્વં સમયં સધૈર્યમ્ ।
અત્રાન્તરે સ્વીયતરઙ્ગભઙ્ગાનિતસ્તતઃ સોત્ક્ષિપતે કદાચિત્ ।
ન જાયતે યાવદસૌ ન તાવદર્થોઽવબોદ્ધું (?) સુશકોઽપરેષાં
ભવેદમીષાં પરિવર્તનાનામ્ ।
તાવચ્ચ નાનાઘટનાવલીનાં વ્યાખ્યાઃ સમસ્તા હ્યધુનાતનીનાં
તથા મનુષ્યસ્ય ચ ભાવિભાગ્યપ્રાક્સૂચનાનિ જલતાડનાનિ ।
યતઃ સ્વરૂપં ચ બલં ચ તસ્યાઃ ફલઞ્ચ પૃથ્વ્યામુપજાયમાનં
નિર્ધારયિષ્યન્તિ મનુષ્યજાતેરાગામિનો ભવ્યયુગસ્ય ચક્રમ ॥

ઇતિ શમ્ ।

ઇતિ શ્રીઅરવિન્દસ્ય ચિન્તનાશ્ચ ચિદુન્મેષાઃ સમ્પુર્ણાઃ ।

Proofread by Saritha Sangameswaran

*Chintanashcha ChidunmeshAh Thoughts and Glimpses by Shri Aurobindo*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*